# Shri Annapurna Stotram 4

# श्रीअन्नपूर्णास्तोत्रम् ४

## Document Information

Text title : Shri Annapurna Stotram 4

File name : annapUrNAstotram4.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, pArvatI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# श्रीअन्नपूर्णास्तोत्रम् ४

श्री देवि दर्शनीयेंऽशा ऐन्द्र्याद्या अम्बिके तव ॥
भव्ये दत्ताऽभये ताभि ह्रीं बीजे नतानव ॥ १॥

गत्यै मात्रे नमस्तेऽस्तु श्रीं गायै पूर्ण संविदे ।
वस मे योगिनि स्वान्ते क्लीं मयेऽर्णेश्वरेश्वरी ॥ २॥

दक्षे सहस्रवक्त्रस्ते न वेत्ति स कलान्गुणान् ।
वदेत्कोरिष्टदे सर्वान् मोक्षसन्दात्रि ते गुणान् ॥ ३॥

धूताद्ये कृपया पाहि भगवत्पूज्य पादुके ।
तमः पूष्ण इवाविद्या गतापर्णे तवेक्षणात् ॥ ४॥

पतिता उद्धृतास्ते हि वरदे शं करप्रिये ।
दया जन्महरा चेत्ते तिष्ठेद्धि कथमावृतिः ॥ ५॥

कस्ते चित्तार्तिहे वेत्ता मान्येऽमरमनोऽतिगे ।
मम ज्ञानं कियत्प्राज्ञि हे शम्भु प्राणवल्लभे ॥ ६॥

लसद्वेदनुते द्वास्थ श्ववद्रणय मामुमे ।
भ्रमप्रदार्थवादा येऽरिप्राया वञ्चितोऽस्मि तैः ॥ ७॥

मत्र्योऽर्भो य इहाम्बाया अङ्के संल्लभतेऽर्थितम् ।
रक्षिता कश्च मे ह्यार्ये न तेऽर्भोऽभेददर्शिनि ॥ ८॥

वासना मुक्तिकृद्देवि पूर्णविज्ञानदायिनी ।
सुखदे नित्यमाङ्गल्येऽर्णेशे ध्यानमुपाविश ॥ ९॥

देवा अर्दित शान्त्यर्थम्मलं ते वै त्वदीरिताः ।
वासनागन्धो मे नास्तु मानादेरार्तिदोऽत्र यः ॥ १०॥

नन्दिनी बलिनी ब्राह्मी भिक्षाभाग्यविवर्धिनी ।
दयाब्धिरोजस्विनीड्या लक्ष्मीस्त्वं सिद्धिरूपिणी ॥ ११॥

सत्येऽस्यम्बा कृपां भोऽभिषिञ्चात्र ध्यधिपालके ।
रक्ष्यो बालः स्वको मात्रा तत्त्वतोऽर्थं वदामि ते ॥ १२॥

स्वल्पज्ञोऽपि शठोऽदान्तो मन्दो वाऽभिमतोऽपि वा ।
तीव्रमाशापरो वाऽयं न चोपेक्षां शिवेऽर्हति ॥ १३॥

भिया न चोक्तवान् शब्दान्देवेड्ये देहि काङ्क्षितम् ।
क्षुच्छान्त्यै ज्ञानभिक्षान्नं हितज्ञे हितमर्पय ॥ १४॥

कृपयाऽनस्तमितया देहि ते चरणे रतिम् ।
तपोदे सादरं याचे हितं मे पारदे कुरु ॥ १५॥

स्तवे तेंऽग ह्यशक्तं मां स्वान्ते शर्वप्रिये स्मर ।
वर्ये वरः स एवार्थ्यो हार्दज्ञेऽतिथिवल्लभे ॥ १६॥

मन्त्राद्याक्षरसहित
दत्तात्रेयो हरिःकृष्णौ उन्मत्तानन्ददायकः ।
मुनिर्दिगम्बरो बालः पिशाचो ज्ञानसागरः ॥

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥

श्री देवि द र्शनीयेंऽशा ऐं द्याद्या अं बिके तव ।
भ व्ये द त्ता भये ताभि ह्रीं बीजे न तानव ॥ १॥

ग त्यै मा त्रे नमस्तेऽस्तु श्रीं गायै पू र्ण संविदे ।
व स मे यो गिनि स्वान्ते क्लीं मयेऽ र्णे श्वरेश्वरी ॥ २॥

द क्षे स ह स्रवक्रस्ते न वेत्ति स कलान्गुणान् ।
व देत्को रिः ष्टदे सर्वान् मो क्षसं दा त्रि ते गुणान् ॥ ३॥

धू ताद्ये कृ पया पाहि भ गवत् पू ज्य पादुके ।
त मः पू ष्ण इवाविद्या ग ताप र्णे तवेक्षणात् ॥ ४॥

प तिता उ द्धृतास्ते हि व रदे शं करप्रिये ।
द या ज न्म हरा चेत्ते ति ष्ठेद्धि क थमावृतिः ॥ ५॥

क स्ते चि त्ता र्तिहे वेत्ता मा न्येऽम र मनोऽतिगे ।
म म ज्ञा नं कियत्प्राज्ञि हे शम्भु प्रा णवल्लभे ॥ ६॥

ल सद्वे द नुते द्वास्थ श्व वद्ग ण य मामुमे ।
भ्र मप्र दा र्थवादा येऽ रि प्राया व ञ्चितोऽस्मि तैः ॥ ७॥

म त्र्योऽर्भो य इहाम्बाया अं के सं ल्ल भतेऽर्थितम् ।
र क्षिता कः च मे ह्यार्ये न तेऽर्भोऽ भे ददर्शिनि ॥ ८॥

वा सना मु क्तिकृद्देवि पू र्णवि ज्ञा नदायिनी ।
सु खदे नि त्यमाङ्गल्येऽ र्णे शेध्या न मुपाविश ॥ ९॥

दे वा अ र्दि त शान्त्यर्थं म लं ते वै त्वदीरिताः ।
वा सना गं धो मे नास्तु मा नादे रा र्तिदोऽत्र यः ॥ १०॥

नं दिनी ब लिनी ब्राह्मी भि क्षा भा ग्य विवर्धिनी ।
द याब्धि रो जस्विनीड्या ल क्ष्मीस्त्वं सि द्धिरूपिणी ॥ ११॥

स त्येऽस्यं बा कृपां भोऽभि षि ञ्चात्र ध्य धिपालके ।
र क्ष्यो बा लः स्वको मात्रा त त्त्वतोऽ र्थं वदामि ते ॥ १२॥

स्व ल्पज्ञोऽ पि शठोऽदान्तो मं दो वाऽ भि मतोऽपि वा ।
ती व्रा मा शा परो वाऽयं न चोपे क्षां शिवेऽर्हति ॥ १३॥

भि या न चो क्तवान्शब्दा न्दे वेड्ये दे हि काङ्क्षितम् ।
क्षु च्छान्त्यै ज्ञा नभिक्षान्नं हि तज्ञे हि तमर्पय ॥ १४॥

कृ पयाऽ न स्तमितया दे हि ते च रणे रतिम् ।
त पोदे सा दरं याचे हि तं मे पा रदे कुरु ॥ १५॥

स्त वे तेंऽ ग ह्यशक्तं मां स्वा न्ते श र्व प्रिये स्मर ।
व र्ये व रः स एवार्थ्यो हा र्दज्ञेऽ ति थिवल्लभे ॥ १६॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं अन्नपूर्णास्तोत्रं सम्पूर्णम् ।

*Shri Annapurna Stotram 4*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*